

॥ श्रीगुरुभ्यो नमः ॥

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

## प्रथमकाण्डे प्रथमः प्रश्नः

### दर्शपूर्णमासौ

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

इ॒षे त्वो॒र्जे त्वा॑ वा॒यव॑ः स्थोपा॒यव॑ः स्थ दे॒वो व॑ः सवि॒ता प्रार्प॑यतु॒ श्रेष्ठ॑तमाय॒ कर्म॑ण॒ आ प्या॑य-
द्ध्वमघ्नि॑या देवभा॒गमूर्ज॑स्वती॒ः पय॑स्वतीः प्र॒जाव॑तीरनमी॒वा अ॑य॒ख्ष्मा मा व॑ः स्ते॒न ई॑शत॒
माऽघश॑ꣳसो रु॒द्रस्य॑ हे॒तिः परि॑ वो वृणक्तु ध्रु॒वा अ॒स्मिन् गोप॑तौ स्यात ब॒ह्वीर् यज॑मानस्य प॒शून्
पा॑हि ॥ [१] ॥

(इ॒षे त्रिच॑त्वारिꣳशत्) ॥ १ ॥

य॒ज्ञस्य॑ घो॒षद॑सि॒ प्रत्यु॑ष्ट॒ꣳ॒ रख्ष॒ः प्रत्यु॑ष्टा॒ अरा॑तय॒ः प्रेयम॑गाद्धि॒षणा॑ ब॒र्॒हिरच्छ॒ मनु॑ना कृ॒ता
स्व॒धया॒ वित॑ष्टा॒ त आ व॑हन्ति क॒वय॑ः पु॒रस्ता᳚द् दे॒वेभ्यो॒ जुष्ट॑मि॒ह ब॒र्॒हिरा॒सदे॑ दे॒वाना᳚म्परिषू॒तम॑सि
व॒र्॒षवृ॑द्धमसि॒ दे॑वबर्॒हि॒र्मा त्वा॒ऽन्वङ् मा ति॒र्यक् पर्व॑ ते राद्ध्यासमाच्छे॒त्ता ते॒ मा रि॑ष॒न्दे॑वबर्॒हिः
श॒तव॑ल्॒शाँ॒व्वि रो॑ह स॒हस्र॑वल्॒शा॒ ॥ [२] ॥ वि व॒यꣳ रु॑हेम पृथि॒व्याः स॒ंपृच॑ः पाहि सु॒सं॒भृता᳚
त्वा॒ संभ॑रा॒म्यदि॑त्यै॒ रास्ना॑ऽसीन्द्रा॒ण्यै स॒न्नह॑नम्पू॒षा ते᳚ ग्र॒न्थिङ्ग्र॑थ्नातु॒ स ते॒ माऽऽस्था॒दिन्द्र॑स्य त्वा
बा॒हुभ्या॒मुद्य॑च्छे॒ बृह॒स्पते᳚र् मू॒र्द्ध्ना ह॑राम्यु॒र्व॑न्तरि॑ख्ष॒मन्वि॑हि देवङ्ग॒मम॑सि ॥ [३] ॥

(स॒हस्र॑वल्॒शा अ॒ष्टात्रि॑ꣳशच्च) ॥ २ ॥

शुन्धद्ध्वन्दैव्याय कर्मणे देवयज्यायै मातरिश्वनो घर्मोऽसि द्यौरसि पृथिव्यसि विश्वधाया असि परमेण धाम्ना दृꣳहस्व मा ह्वार् वसूनाम्पवित्रमसि शतधारँव्वसूनाम्पवित्रमसि सहस्र-धारꣳ हुतः स्तोकोहुतो द्रप्सोऽग्नये बृहते नाकाय स्वाहा द्यावापृथिवीभ्याꣳ सा विश्वायुः सा विश्वव्यचाः सा विश्वकर्मा सम्पृच्यद्ध्वमृतावरीरूर्मिणीर्मधुमत्तमा मन्द्रा धनस्य सातये सोमेन त्वाऽऽतनच्मीन्द्राय दधि विष्णो हव्यꣳ रख्षस्व ॥ [४] ॥

(सोमे नाष्टौ च) ॥ ३ ॥

कर्मणे वान्देवेभ्यः शकेयँव्वेषाय त्वा प्रत्युष्टꣳ रख्षः प्रत्युष्टा अरातयो धूरसि धूर्व धूर्व-न्तन्धूर्व तँय्योँऽस्मान् धूर्वति तन्धूर्वयँव्वयन्धूर्वामस्त्वन्देवानामसि सस्नितमम्पप्रितमञ्जुष्टतमँव्व-ह्नितमन्देवहूतममह्रुतमसि हविर्धानन्दृꣳहस्व मा ह्वार् मित्रस्य त्वा चख्षुषा प्रेख्षे मा भेर्मा सँव्विक्था मा त्वा ॥ [५] ॥ हिꣳसिषमुरु वाताय देवस्य त्वा सवितुः प्रसवेऽश्विनोर् बाहु-भ्याम्पूष्णो हस्ताभ्यामग्नये जुष्टन्निर्वपाम्यग्नीषोमाभ्यामिदन्देवानामिदमु नः सह स्फात्यै त्वा नारात्यै सुवरभि वि ख्येषँव्वैश्वानरञ्ज्योतिर् दृꣳहन्तान्दुर्या द्यावापृथिव्यो रुर्वन्तरिख्ष मन्विह्य-दित्यास्त्वोपस्थे सादयाम्यग्ने हव्यꣳ रख्षस्व ॥ [६] ॥

(मा त्वा षट्चत्वारिꣳशच्च) ॥ ४ ॥

देवो वः सवितोत् पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिरापो देवीरग्रेपुवो अग्रेगु-वोऽग्र इमँय्यज्ञन्नयताग्रे यज्ञपतिन्धत्त युष्मानिन्द्रोऽवृणीत वृत्रतूर्ये यूयमिन्द्रमवृणीद्ध्वँव्वृत्रतूर्ये प्रोख्षिताः स्थाग्नये वो जुष्टम्प्रोख्षाम्यग्नीषोमाभ्याꣳ शुन्धद्ध्वन्दैव्याय कर्मणे देवयज्याया अव-धूतꣳ रख्षोऽवधूता अरातयोऽदित्यास्त्वगसि प्रति त्वा ॥ [७] ॥ पृथिवी वेत्त्वधिषवणमसि वानस्पत्यम्प्रति त्वाऽदित्यास्त्वग्वेत्त्वग्नेस्तनूरसि वाचो विसर्जनन्देववीतये त्वा गृह्णाम्यद्रिरसि वानस्पत्यः स इदन्देवेभ्यो हव्यꣳ सुशमि शमिष्वेषमा वदोर्जमा वद द्युमद्वदत वयꣳ सङ्घातञ्जेष्म वर्षवृद्धमसि प्रति त्वा वर्षवृद्धँव्वेत्तु परापूतꣳ रख्षः परापूता अरातयो रख्षसाम्भागो ऽसि वायुर्वो वि विनक्तु देवो वः सविता हिरण्यपाणिः प्रति गृह्णातु ॥ [८] ॥

(त्वा भाग एकादश च) ॥ ५ ॥

अवधूतꣳ रक्षोऽवधूता अरातयोऽदित्यास्त्वगसि प्रति त्वा पृथिवीवेत्तु दिवः स्कंभनिरसि प्रति त्वाऽदित्यास्त्वग्वेत्तु धिषणाऽसि पर्वत्या प्रति त्वा दिवः स्कंभनिर्वेत्तु धिषणाऽसि पार्वतेयी प्रति त्वा पर्वतिर्वेत्तु देवस्य त्वा सवितुः प्रसवेऽश्विनोर् बाहुभ्याम्पूष्णोहस्ताभ्यामधि वपामिधान्यमसि धिनुहि देवान् प्राणाय त्वा ऽपानाय त्वा व्यानाय त्वा दीर्घामनु प्रसितिमायुषेधान्देवो वः सविता हिरण्यपाणिः प्रति गृह्णातु ॥ [९] ॥

(प्राणाय त्वा पञ्चदश च) ॥ ६ ॥

धृष्टिरसि ब्रह्म यच्छापाग्नेऽग्निमामादञ्जहि निष्क्रव्यादꣳ सेधाऽऽदेवयजव्वँह निर्दग्धꣳ रक्षो निर्दग्धा अरातयो ध्रुवमसि पृथिवीन्दृꣳहाऽऽ*युर् दृꣳह प्रजान्दृꣳह सजातानस्मै यजमानाय पर्यूह धर्त्रमस्यन्तरिक्षन्दृꣳह प्राणन्दृꣳहापानन्दृꣳह सजातानस्मै यजमानाय पर्यूह धरुणमसि दिवन्दृꣳह चक्षुर् ॥ [१०] ॥ दृꣳह श्रोत्रन्दृꣳह सजातानस्मै यजमानाय पर्यूह धर्मासि दिशो दृꣳह योनिन्दृꣳह प्रजान्दृꣳह सजातानस्मै यजमानाय पर्यूह चितः स्थ प्रजामस्मै रयिमस्मै सजातानस्मै यजमानाय पर्यूह भृगूणामङ्गिरसान्तपसा तप्यद्ध्वय्यँयानि घर्मे कपालान्युपचिन्वन्ति वेधसः। पूष्णस्तान्यपि व्रत इन्द्रवायू वि मुञ्चताम् ॥ [११] ॥

(चक्षु रष्टाचत्वारिꣳशच्च) ॥ ७ ॥

सव्वँपामि समापो अद्भिरग्मत समोषधयो रसेन सꣳ रेवतीर् जगतीभिर् मधुमतीर् मधुमतीभिः सृज्यद्ध्वमद्भ्यः परि प्रजाताः स्थ समद्भिः पृच्यद्ध्वञ्जनयत्यै त्वा सय्यौँम्यग्नये त्वाऽग्नीषोमाभ्याम्मखस्य शिरोऽसि घर्मोऽसि विश्वायुरुरु प्रथस्वोरु ते यज्ञपतिः प्रथतान्त्वचङ्गृह्णीष्वान्तरितꣳ रक्षोऽन्तरिता अरातयोदेवस्त्वा सविता श्रपयतु वर्षिष्ठे अधि नाकेऽग्निस्ते तनु-

वम्माऽति धागग्ने हव्यꣳ रक्षस्व सम्ब्रह्मणा पृच्यस्वैकताय स्वाहा द्विताय स्वाहा त्रिताय स्वाहा ॥ [१२] ॥

(सविता द्वाविꣳशतिश्च) ॥ ८ ॥

---

आ दद इन्द्रस्य बाहुरसि दक्षिणः सहस्रभृष्टिः शततेजा वायुरसि तिग्मतेजाः पृथिवि देवयज न्योषध्यास्ते मूलम्मा हिꣳसिषमपहतोऽररुः पृथिव्यै व्रजङ्गच्छ गोस्थानव्वँर्षतु ते द्यौर्बधान देव सवितः परमस्याम्परावति शतेन पाशैर्योऽस्मान् द्वेष्टि यञ्च वयन्द्विष्मस्तमतो मा मौगपहतोऽररुः पृथिव्यै देवयजन्यै व्रजं ॥ [१३] ॥ गच्छ गोस्थानव्वँर्षतु ते द्यौर्बधान देव सवितः परमस्याम्परावति शतेन पाशैर्योऽस्मान् द्वेष्टि यञ्च वयन्द्विष्मस्तमतो मा मौगपह-तोऽररुः पृथिव्या अदेवयजनो व्रजङ्गच्छ गोस्थानव्वँर्षतु ते द्यौर्बधान देव सवितः परमस्याम्प-रावति शतेन पाशैर्योऽस्मान् द्वेष्टि यञ्च वयन्द्विष्मस्तमतो मा ॥ [१४] ॥ मौगररुस्ते दिवम्मा स्कान्वसवस्त्वा परि गृह्णन्तु गायत्रेण छन्दसारुद्रास्त्वा परि गृह्णन्तु त्रैष्टुभेन छन्दसाऽऽदि-त्यास्त्वा परि गृह्णन्तु जागतेन छन्दसा देवस्य सवितुः सवे कर्म कृण्वन्ति वेधस ऋतमस्यृतसद-नमस्यृतश्रीरसि धा असि स्वधा अस्युर्वी चासि वस्वी चासि पुरा क्रूरस्य विसृपो विरप्शिन् नुदा-दाय पृथिवीञ्जीरदानुर्यामैरयन् चन्द्रमसि स्वधाभिस्तान्धीरासो अनुदृश्य यजन्ते ॥ [१५] ॥

(देवयजन्यै व्रजं तमतो मा विरप्शिन् नेकादश च) ॥ ९ ॥

---

प्रत्युष्टꣳ रक्षः प्रत्युष्टा अरातयोऽग्नेर्वस्तेजिष्ठेन तेजसा निष्टपामि गोष्ठम्मा निर्मृक्षव्वाँ-जिनन्त्वा सपत्नसाहꣳ सम्मार्ज्मि वाचम्प्राणञ्चक्षुः श्रोत्रम्प्रजाय्योँनिम्मा निर्मृक्षव्वाँजिनीन्त्वा सपत्नसाहीꣳ सम्मार्ज्म्याशासाना सौमनसम्प्रजाꣳ सौभाग्यन्तनूम्। अग्नेरनुव्रता भूत्वा सन्नह्ये सुकृताय कम्॥ सुप्रजसस्त्वा वयꣳ सुपत्नीरुप ॥ [१६] ॥ सेदिम। अग्ने सपत्नदम्भनमदब्धासो अदाभ्यम्॥ इमव्विँष्यामि वरुणस्य पाशय्यँमबध्नीत सविता सुकेतः। धातुश्च योनौ सुकृ-तस्य लोके स्योनम्मे सह पत्या करोमि॥ समायुषा संप्रजया समग्ने वर्चसा पुनः। सम्पत्नी

पत्या॒ऽहङ्ग॑च्छे स॒मात्मा त॒नुवा॒ मम॑ ॥ म॒ही॒नाम्पयो॒ऽस्योष॑धीना॒ꣳ॒ रस॒स्तस्य॒ तेऽख्षी॑यमाणस्य॒
निर्॒ ॥ [१७] ॥ व॑पामि म॒ही॒नाम्पयो॒ऽस्योष॑धीना॒ꣳ॒ रसो॒ऽद॑ब्धेन त्वा॒ चख्षु॒षाऽवे॑ख्षे सुप्रजा॒-
स्त्वाय॒ तेजो॑ऽसि॒ तेजो॒ऽनु प्रेह्य॒ग्निस्ते॒ तेजो॒ मा वि नै॑द॒ग्नेर्॒ जि॒ह्वाऽसि॑ सु॒भूर्दे॒वाना॒न्धाम्ने॑धाम्ने दे॒वेभ्यो॒
यजु॑षेयजुषे भव शु॒क्रम॑सि॒ ज्योति॑रसि॒ तेजो॑ऽसि दे॒वो व॑ः सवि॒तोत् पु॑ना॒त्वच्छि॑द्रेण प॒वित्रे॑ण॒ वसो॒ः
सूर्य॑स्य र॒श्मिभि॑ः शु॒क्रन्त्वा॑ शु॒क्राया॒न्धाम्ने॑धाम्ने दे॒वेभ्यो॒ यजु॑षेयजुषे गृह्णा॒मि॒ ज्योति॑स्त्वा॒ ज्योति॑-
ष्यर्चिस्त्वा॒ऽर्चिषि॒ धाम्ने॑धाम्ने दे॒वेभ्यो॒ यजु॑षेयजुषे गृह्णामि ॥ [१८] ॥

(उप॒ नी र॒श्मिभि॑ः शु॒क्रꣳ॒ षोड॑श च) ॥ १० ॥

⋆

कृष्णो॑ऽस्याखरे॒ष्ठो॑ऽग्नये॑ त्वा॒ स्वाहा॒ वेदि॑रसि ब॒र्हिषे॑ त्वा॒ स्वाहा॑ ब॒र्हिर॑सि स्रु॒ग्भ्यस्त्वा॒ स्वाहा॑
दिवे॒ त्वा॒ऽन्तरि॑ख्षाय त्वा पृथि॒व्यै त्वा॑ स्व॒धा पि॒तृभ्य॒ ऊर्ग्भ॑व ब॒र्हि॒षद्भ्य॑ ऊ॒र्जा पृ॑थि॒वीङ्ग॑च्छत
विष्णो॒ः स्तू॒पो॒ऽस्यू॒र्णा॑म्रदसन्त्वा स्तृणामि स्वास॒स्थन्दे॒वेभ्यो॑ ग॒न्धर्वो॑ऽसि वि॒श्वाव॑सु॒र् विश्व॑स्मा॒-
दीष॑तो॒ यज॑मानस्य परि॒धिरि॑ड ई॒डित॒ इन्द्र॑स्य बा॒हुर॑सि ॥ [१९] ॥ दख्षि॑णो॒ यज॑मानस्य
परि॒धिरि॑ड ई॒डितो॒ मि॒त्रावरु॑णौ त्वोत्तर॒तः परि॑ धत्ता॒न्ध्रुवे॑ण॒ धर्म॑णा॒ यज॑मानस्य परि॒धिरि॑ड
ई॒डित॒ः सूर्य॑स्त्वा पु॒रस्ता॑त् पातु॒ कस्या॑श्चिद॒भिश॑स्त्या वी॒तिहो॑त्रन्त्वा कवे द्यु॒मन्त॒ꣳ॒ समि॑धीमह्य॒ग्ने॑
बृ॒हन्त॑मद्ध्व॒रे वि॒शो य॒न्त्रे स्थो॒ वसू॑ना॒ꣳ॒ रु॒द्राणा॑मादि॒त्याना॒ꣳ॒ सद॑सि सीद जु॒हूरु॑प॒भृद् ध्रु॒वाऽसि॑
घृ॒ताची॒ नाम्ना॑ प्रि॒येण॒ नाम्ना॑ प्रि॒ये सद॑सि सी॒दै॒ता अ॑सदन्थ् सुकृ॒तस्य॑ लो॒के ता वि॑ष्णो पाहि पा॒हि
य॒ज्ञं पा॒हि य॒ज्ञप॑तिम्पा॒हि माय्य॑ज्ञ॒निय॑म् ॥ [२०] ॥

(बा॒हुर॑सि प्रि॒ये सद॑सि॒ पञ्च॑दश च) ॥ ११ ॥

⋆

भुव॑नमसि॒ वि प्र॑थस्वाग्ने॒ यष्ट॑रि॒दन्नम॑ः । जु॒हेह्य॒ग्निस्त्वा॑ ह्वयति देवय॒ज्याया॒ उप॑भृ॒देहि॑ दे॒वस्त्वा॑
स॒वि॒ता ह्व॑यति देवय॒ज्याया॒ अग्ना॑विष्णू॒ मा वा॒मव॑ क्रमिष॒व्वि जि॑हाथा॒म्मा मा॒ सन्ता॑प्तँल्लो॒कम्मे॑
लो॒क॒कृतौ॑ कृणु॒ताँ॒व्विष्णो॒ः स्थान॑मसी॒त इन्द्रो॑ अकृणोद् वी॒र्या॑णि समा॒रभ्यो॒र्द्ध्वो॑ अ॑द्ध्व॒रो दि॑वि॒-
स्पृश॒मह्रु॑तो य॒ज्ञो य॒ज्ञप॑ते॒रिन्द्रा॑वान्थ् स्वाहा॑ बृ॒हद्भाः पा॒हि मा॑ऽग्ने दु॒श्चरि॑ता॒दा मा॒ सु॒चरि॑ते भज
म॒खस्य॒ शिरो॑ऽसि॒ संज्योति॑षा॒ ज्योति॑रङ्क्ताम् ॥ [२१] ॥

(अहुत एकविꣳशतिश्च) ॥ १२ ॥

वाजस्य मा प्रसवेनोद्ग्राभेणोदग्रभीत्। अथा सपत्नाꣳ इन्द्रो मे निग्राभेणाधराꣳ अकः॥ उद्ग्राभञ्च निग्राभञ्च ब्रह्म देवा अवीवृधन्न्। अथा सपत्नानिन्द्राग्नी मे विषूचीनान् व्यस्यताम्॥ वसुभ्यस्त्वा रुद्रेभ्यस्त्वाऽऽदित्येभ्यस्त्वाऽक्तꣳ रिहाणा वियन्तु वयः॥ प्रजाय्योनिम्मा निर्मृ-क्षमा प्यायन्तामाप ओषधयो मरुताम्पृषतयः स्थ दिवं ॥ [२२] ॥ गच्छ ततो नो वृष्टिमेरय। आयुष्पा अग्नेऽस्यायुर्मे पाहि चक्षुष्पा अग्नेऽसि चक्षुर्मे पाहि ध्रुवाऽसि यम्परिधिम्पर्यधत्था अग्ने देव पणिभिर् वीयमाणः। तन्त एतमनु जोषम्भरामि नेदेष त्वदपचेतयातै यज्ञस्य पाथ उप समितꣳ सꣳस्रावभागाः स्थेषा बृहन्तः प्रस्तरेष्ठा बर्हिषदश्च ॥ [२३] ॥ देवा इमाँव्वाच-मभि विश्वे गृणन्त आसद्यास्मिन् बर्हिषि मादयद्ध्वमग्नेर् वामपन्नगृहस्य सदसि सादयामि सुम्नाय सुम्निनी सुम्ने मा धत्तन्धुरि धर्यौ पातमग्नेऽदब्धायोऽशीततनो पाहि माऽद्य दिवः पाहि प्रसित्यै पाहि दुरिष्ट्यै पाहि दुरद्मन्यै पाहि दुश्चरितादविषन्नः पितुङ्कृणु सुषदा योनिꣳ स्वाहा देवा गातुविदो गातुँव्वित्त्वा गातु मित मनसस्पत इमन्नो देव देवेषु यज्ञꣳ स्वाहा वाचि स्वाहा वाते धाः ॥ [२४] ॥

(दिवं च वित्त्वा गातुं त्रयोदश च) ॥ १३ ॥

उभा वामिन्द्राग्नी आहुवद्ध्या उभा राधसः सह मादयद्ध्यै। उभा दातारविषाꣳ रयीणामुभा वाजस्य सातये हुवे वाम्॥ अश्रवꣳ हि भूरिदावत्तरा वाँव्विजामातुरुत वा घा स्यालात्। अथा सोमस्य प्रयती युवभ्यामिन्द्राग्नी स्तोमञ्जनयामि नव्यम्॥ इन्द्राग्नी नवतिम्पुरो दासपत्नीरधू-नुतम्। साकमेकेन कर्मणा॥ शुचिन्नु स्तोमन्नवजातमद्येन्द्राग्नी वृत्रहणा जुषेथाम् ॥ [२५] ॥ उभा हि वाꣳ सुहवा जोहवीमि ता वाजꣳ सद्य उशते धेष्ठा॥ वयमु त्वा पथस्पते रथन्न वाज-सातये। धिये पूषन्नयुज्महि॥ पथस्पथः परिपतिँव्वचस्या कामेन कृतो अभ्यानडर्कम्। स नो रासच्छुरुधश्चन्द्राग्रा धियन्धियꣳ सीषधाति प्र पूषा॥ क्षेत्रस्य पतिना वयꣳ हितेनेव जया-

मसि। गामश्वम्पोषयित्वा स नो ॥ [२६] ॥ मृडातीदृशे॥ क्षेत्रस्य पते मधुमन्तमूर्मिन्धे-नुरिव पयो अस्मासु धुक्ष्व। मधुश्चुतङ्घृतमिव सुपूतमृतस्य नः पतयो मृडयन्तु॥ अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान्। युयोध्यस्मज्जुहुराणमेनो भूयिष्ठान्ते नम-उक्तिँविधेम॥ आ देवानामपि पन्थामगन्म यच्छक्नवाम तदनु प्रवोढुम्। अग्निर् विद्वान्थ् स यजाथ् ॥ [२७] ॥ सेदु होता सो अध्वरान्थ् स ऋतून् कल्पयाति॥ यद्वाहिष्ठन्तदग्नये बृहदर्च विभावसो। महिषीव त्वद्रयिस्त्वद्वाजा उदीरते॥ अग्ने त्वम्पारया नव्यो अस्मान्थ् स्वस्तिभिरति दुर्गाणि विश्वा। पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शँय्योः॥ त्वमग्ने व्रतपा असि देव आ मर्त्येष्वा। त्वँय्यज्ञेष्वीड्यः॥ यद्वो वयम्प्रमिनाम व्रतानि विदुषान्देवा अविदुष्टरासः। अग्निष्टद् विश्वमा पृणाति विद्वान्येभिर् देवाँ ऋतुभिः कल्पयाति ॥ [२८] ॥

(जुषेथामा स नो यजा दा त्रयोविँशतिश्च) ॥ १४ ॥

## समाप्ति कोर्वैः

(इषे त्वा यज्ञस्य शुन्धध्वं कर्मणे वां देवोऽवधूतं धृष्टिः सँवपा म्या ददे प्रत्युष्टं कृष्णोऽसि भुवनमसि वाजस्योभा वां चतुर्दश)
(इषे दृँह भुवन मष्टाविँशतिः)
(इषे त्वा कल्पयाति)

॥ हरिः ॐ ॥

**प्रथमकाण्डे प्रथमः प्रश्नः समाप्तः**

| अनुवाकाः | पञ्चशत्यः |
| --- | --- |
| १४ | २८ |

ॐ